This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पारवलअंक

	शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
m-2563	पुनः प्रतिष्ठा भगवानप्रायश्चित		दर्शन	पूर्ण	-	3/6	8	नागरी	कागद	11	35		

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः॥ अथपुनः प्रतिष्ठा। नामधिकृत्य हयशीर्षपंचरात्रे। चांडालमधु
संस्पर्शाद्दूषिता वह्निनाथवा॥ अपुण्यजनसंस्पृष्टा विप्रक्षतजदूषिता॥ संस्कार्येति
शेषः। पट्टीर्थादर्शैराघवनहृष्टं। खंडिते स्फुटिते दग्धे भ्रष्टे मानविवर्जिते॥ यागहीनेप
शुस्पृष्टे पतिते दुष्टभूमिषु॥ अन्यमंत्रार्चिते चैव पतितस्पर्शदूषिते॥ दशस्वेतेषु नो चक्रुः
संनिधानं दिवौकसः॥ यागपूजा। पशुः गर्दभादिः। सिद्धांतशेखरे। चौरैश्चांडालपतितैः
श्वोरव्यास्पर्शनेसती॥ शिवाद्युपहते चैव प्रतिष्ठां पुनराचरेत्॥ अर्चायाः भंगे चोपरोदौ
तद्दिने चोपवासइति। पंचरात्रे। अंगारगादिसंधाने प्रतिष्ठां पुनराचरेत्॥ जलाधिवासरहि
तं नेत्रो। मीलनवर्जितमिति। शुद्धबिंबकृविधुः। द्रव्यवहृतशौचानां देवनार्चानां भूयः प्र
तिष्ठापने शुद्धिरिति॥ अर्चाः प्रतिमाः। द्रव्यवतो चादिहृत्कशौचं कृत्वापुनः प्रतिष्ठां कुर्यादित्यर्थः।
स्मृत्यर्थसारेप्येवं॥ पुनः प्रतिष्ठा विधिर्बौधायनसूत्रे पूर्वप्रतिष्ठितस्य बुद्धिपूर्वमेकरात्रं द्वि
रात्रमेकमासं वा अर्चाद्दिनादि विच्छेदश्शूद्ररजस्वलाद्युपस्पर्शने जलाधिवासं कृत्वा कलशेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्नपयेत्। ततः पंचगव्येन परं शुद्धोदकेन स्नपयेत्। अष्टसहस्रमष्टशतमष्टाविंशतिवा कल
॥६॥ शैः पुरुषसूक्तेन स्नात्वा पुष्पाणि दत्वा गुडोदनं निवेदयेदिति। अयं मलमासगु
रुशुक्रास्तादावपि कार्य इति मदनरत्ने हेमाद्रौ च। अथास्य प्रयोगः। निमित्ताने
तरं पुण्येऽह्नि विप्रकथिते तद्दिना पूर्व यः सपत्नीक यजमान आचार्य उपोषितः सन्
अधिवासनं विधिवदस्य प्रातः स्नानेन नित्यक्रियः ताम्रमयी प्रतिमा चेत् अम्लद्रव्यैः संशोध्यापि
त्तलमयि चेद् दृष्टरूलोमदासंशतेध्य पीठादावुपवेश्य तत्पुरतः देशकालौ संकीर्त्यअ
मुकचलार्चायाः अमुकस्पर्शजन्यदोषनिबर्हणद्वारा पुनरर्चायां देवतासान्निध्यार्थं मम
यजमानस्य वासकुटुंबस्य क्षेमायुरभिवृद्धिपूर्वकं श्रीपरमेश्वरप्रीत्यर्थं बोधायनोक्त
प्रकारेण पुनः प्रतिष्ठां करिष्ये इति संकल्प्य। पूजाविच्छेदे तु अमुकचलार्चायाः पूजावि
च्छेदजन्यदोषनिबर्हणेत्यादि योज्यं। तद्गतदगत्वेन विहितं गणपतिपूजनं कर्मणः पुण्याह
वाचनमाचार्यवर्णनं च करिष्ये। इति संकल्प्य। तानि रत्वा शुद्धजलपूरितेन कलशेन देवं ॥६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यमूर्धी संततां धारां पातयन्पुरुषसूक्तं पठेत्। ततो गायत्र्या त्रिपलपरिमितेन गोमूत्रेण
गंधद्वारामिति अंगुष्ठपरिमितेन गोमयेन आप्यायस्वेति सप्तपलेन क्षीरेण दधिक्राव्णो
इति तावत्प्रमाणेन दध्ना घृतं मिमिक्ष इत्येकपलेन घृतेन देवस्य त्वेति तावत्परिमितकुशो
दकेन तस्मिन्मंत्रे अभिषिंचामीति वाक्यशेषः। इति पंचगव्यैः संस्नाप्य अपरं शुद्धोदकेन
स्नपयेत्। तत्रक्रमः। देवस्याग्रे दक्षिणाभागमारभ्योदगपवर्गमष्टाविंशति कलशस्थापनं मही
द्यौरिमंत्रेण भूमिं स्पृष्ट्वा ओषधयः संमिति यवान्निक्षिप्य आकलशेषु विशंतीति कलशा
निधाय इमं मे गंगे इति शुद्धजलेन पूर्य आपोवा इदं सर्वमित्यनुवाकेन सर्वकलशोदकेषु
ग पदत्तु मध्ये गंधद्वारामिति गंधं प्रक्षिप्य कलशे क्षिप्त्वा या ओषधीरिति सर्वौषधीः। कांडात्कां०
इति दूर्वा अश्वत्थे व इति पंचपल्लवान् स्योना पृथिवीति सप्तमृत्तिकायाः फलिनीरिति पू
गीफलानि सहिरत्नानीति पंचरत्नानि तेषामसंभवे सुवर्णं वा हिरण्यरूप इति व्यक्षिप्य वा
युवा सुवासा इति सूत्रेण कलशकंठान् वेष्टयित्वा त्यंतं रत्वा परिकलशं वरुणमावाह्य सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संपूज्य। कलशस्य मुखे॰ देवदानवसंवादेहनि पठि त्वा दक्षिणस्थ प्रथम कलशमादाय
पुरुषसूक्तं पठन् संतत धारया कलशोदकेन देवमस्तके भिषिंचेत्। एवं न इत्तरकलशैः पु ॥२॥
रुषसूक्तस्यावृत्तिभिरभिषेकं कुर्यात्। इत्थं अष्टाविंशतिकलशा स्नानं शक्तस्याष्टशतैः
ततो निशक्तस्याष्टोत्तर सहस्रैरिति। ततः पुरुषसूक्तेन प्रत्यृचं षोडशपुष्पांजलीन् दत्वा पु
रुषाहारपर्याप्तं गुडोदनं देवस्याग्रे निधाय निवेदयेत् वक्ष्यमाण मंत्रेण। ॐ त्वामेकमा
द्यं पुरुषं पुराणं नारायणं विश्वसृजं यजामहे। त्वमेव यज्ञो विहितो विधेयस्त्वमात्मना
त्मन्प्रतिगृह्णीष्व हव्यं इति। एतस्य पुनः प्रतिष्ठारूपकर्मणः सांगतायै गुरवे आचार्यपुरो
हितस्यैवगो निष्क्रयं द्रव्यं दातुमहमुत्सृजेति इत्थं ब्राह्मण भोजनसंकल्पं च कृत्वा एतत्क
र्मेश्वरार्पणं कृत्वा ततो देवताप्रसादसिध्यर्थं महापूजां कुर्यात्। तत्र प्रयोगः। देशकालौ
संकीर्त्य अमुकदेवताप्रसादार्थं महापूजां करिष्ये इति संकल्प्य। भगवन्बोधायनोक्तप्र
कारेण यातेरुद्रेतिशिखायां इत्यारभ्य विशेषतो शिवमावाहयेत्से तेन कृत्वा पुरुषसूक्तन्यास ॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मपिस्वशरीरे देवेच।स्रु।खा।कलशार्चनंशंखघंटार्चनंचाविधाय पुरुषसूक्तस्यआद्यया
ऋचादेवमस्तके पुष्पांजलिंआवाहनस्थानेदत्वा।पुरुषएवेत्यासनं।एतावानस्येतिपा
द्यं।त्रिपादूर्ध्वेत्यर्घ्यं।तस्माद्विराळित्याचमनीयं।यत्पुरुषेणेतिस्कंगंधतैलौ:नोन्मर्थस्क
गंधद्रव्यैश्चपिळिप्य स्कंधोदकेनप्रक्षाल्यशक्त्यामहारुद्रेणालपुरुद्रेणेकादश
शिन्यावातथैवपुरुषसूक्तस्य सहस्रशताष्टाविंशत्यावृत्तिभिर्ब्राह्मणान्वितोभिषेकं
कुर्यात्।अशक्तश्चेत्सकृद्वावृत्त्यानमकचमकयो:पुरुषसूक्तस्यषोडशावृत्तिभि
श्चाभिषेकंदत्वाशुष्कवस्त्रेणदेवंपरिमार्ज्य।तंयज्ञमितिवस्त्रं।तस्माद्यज्ञादिति
यज्ञोपवीतं।तस्माद्यज्ञात्सर्वहुतऋचेतिगंधं।।तस्मादश्वेतिपुष्पं।यत्पुरुषंधूपं।
ब्राह्मणोस्येतिदीपं।चंद्रमामनसेतिनैवेद्यंपुरुषाहारपर्याप्तनानाविधशर्करापयोदधिघृता
दियुक्तंमन्नंनैवेद्यमध्येपानीयंकरोद्वर्तनं।।नाभ्यासीतिनारिकेलाम्रकदलीफलादी
नि।सप्तास्यासन्नितिलवंगेलाकर्पूरजातिफलक्रमुकफलकंकोलखदिरसारयुक्तंहरि

शतनागवल्लिदलालंकृतं तांबूलं। यज्ञेन यज्ञमिति यथाशक्ति दक्षिणां कर्पूरनीराजन
॥३॥ मंत्रपुष्पांजल्यंतं समर्प्य पुरुषसूक्तेन षोडशपुष्पांजलीं दत्वा पुनः पुरुषसूक्तं द्विवारं
जपित्वा तेनैव षोडशनमस्कारान् कृत्वा देवमनेकधा संप्रार्थ्य कृतं कर्म ईश्वरार्पणं कृत्वा
स्वहस्तकृतो भुंजीतेति महापूजा॥ इदमत्स्यो पहतौ॥ चांडालरजस्वलादिस्पर्शने तु दे
पहतौ बुद्धिपूर्वमनेककालपूजाविच्छेदे च पर्वोक्तप्राणप्रतिष्ठासहितं प्रतिष्ठाविधिं म
हापूजां च कुर्यात्॥ अभिदग्धे तु जन्मयुत्तारणमपि कुर्यात्। पुनः प्रतिष्ठा रेवार्चा प्रासाद
भेदे तु भल्लपाणो काश्यपः। वापीकूपारामसेतुसभातडागदेवप्रदेवतापतनभेदे प्रायश्चि
त्तं च तत्र तु आहुतीर्जुहुयात्। इरं विष्णु मानस्तोके विष्णोः कर्माणि तद्विष्णोरिति या
देवता प्रसादयेति तस्यै देवतायै ब्राह्मणाभोजयेत् इति। शंखलिखितौ॥ प्रतिष्ठारा
मकूपादिक्रमेण ध्वजसेतुनिपातने ष्वतत्समुत्थानं प्रतिसंस्कारो ष्टशतं च निपातिना
मिति। समुत्थानं प्रक्रिया प्रतिसंस्कारं पुनः प्रतिष्ठा। अष्टशतं पणा दंडश्चेत्यर्थः। भग्न ॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतिमाप्रतिपत्तिरुक्ता पदार्थादर्शे राघवभट्टकृते। खंडितां स्फुटितां शीर्णां अवली
ढां च वह्निना। प्रतिमां वर्जयेद्यत्नात् ग्रामस्याशुक्षणात्स्मृता।। निक्षिपेद्वारुजामग्नौ त
थान्याम् अप्सु निक्षिपेत्। इति। अथ महापूजाप्रसंगात् अभ्यंगप्रमाणं पंचामृतप्रमाणं
चोच्यते।। तदुक्तं निर्णयसिंधौ हेमाद्रौ शिवधर्मे। स्नानं पलशतं ज्ञेयमभ्यंगः पंचवि
शतिः। पलानां द्वे सहस्रे तु महास्नानं प्रकीर्तितं। पंचविंशत्पलं लिंगमभ्यंगं कारयेद्बुधः।।
शिवस्य सर्पिषो मानं प्रोक्तं पलशतेन च। तावता मधुना चैव ततः पुनः। तावतैव च क्षीरेण
गव्येनैव भवेत्ततः। भूयः साद्धसहस्रेण पलानामेक्षवेण च। रसेनैकारयेत्स्नानं भक्त्या चो
दकं बुनानतः। इति विष्णुधर्मे तु स्कांदे। क्षीराद्दशगुणं दध्ना घृतेनैव दशोत्तरं। घृताद्दशगुणं
क्षौद्रं क्षौद्रं च्चैक्षवं तथेति। ब्राह्मे। देवानां प्रतिमा यत्र घृताभ्यंगसमा भवेत्। पलानि तत्र दे
यानि शुद्धया पंचविंशतिः। इति पूर्णप्रकाशो पुनः प्रतिष्ठादि ॥५॥ श्रीजगदंबार्पणमस्तु॥
जले दूषिते प्रायश्चित्तं शुद्धिश्च॥ हारीतः। घटानां शतमुद्धृत्य पंचगव्यं क्षिपेत्ततः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्वभिः श्वपाक चांडालैर्दूषितेषु विशोधनं । विण्मूत्रादि दूषिते कुंभानां षष्टिमुद्धरेत्।
यं इदं प्रवाह रहित कूपादि विषयं न तु वेगवन्नद्यादि विषयं । म्लेच्छार्थे सारे। वापीकूपतडागा
दिषु चांत्यजलेषु मनुष्यमार्जारादि शवे क्लिन्ने जीर्णे सति तज्जलं सर्वमुद्धृत्य मृत्तिकां परि
॥४॥ तज्यां कृत्य पंचगव्य प्रोक्षणाच्छुद्धिः । पाषाणेष्टिकाभिर्बद्धस्थानेरहितं । दारुबद्धे प्रक्षाल
नमेव। बहुजले षष्टिकुंभोद्धारः। गोमेषकादि क्षुद्रप्राणिपाते त्रिंशत्कुंभोद्धारः। गोमूत्रादि
घ प्रक्षेपश्च जले वापीकूपजलेन रशवे क्लिन्ने [illegible] तज्जलमुद्धृत्य पंचगव्य प्रक्षेपाच्छु रा
द्धिः। पशुशवपाते प्येषा शुद्धिः। तत्र जलेन मरणे जलस्य त्रिरात्रमाशोचं तदंते शर्वेला
शुद्धिः कार्या । नदीस्रोत तडागजले अंत्यजे दूषिते तत्स्थत जलस्थानादन्यत्र जलं शुद्ध एव।
इति शुद्धिः। क्लिन्नभिन्नशवे चैव कूपस्थं यदि दृश्यते। पयः पिबेत्त्रिरात्रेण मानुषे द्विगुणं स्मृ
तं॥ कूपे विण्मूत्र संसृष्टे पीत्वा तोयं द्विजोत्तमाः॥ त्रिरात्रेण विशुध्यंति कुंभे सांतपनं
स्मृतं॥ इति। जलपान प्रायश्चित्तं। ॥श्रीजगदंबार्पणमस्तु॥ ॥श्री॥ ॥श्री॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=08.01.20 12:36
,TRANSFERRED=2020/01/08 at 12:38:16
,PAGES=10
,TYPE=STD
,NAME=S0002492
,Book Name=M-2563-PUN PARTISHTHA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection